॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय १८

प्रविष्टायाअ म् हुता"स म् तु वेदवत्या म् स रावंअ् ।
पुष्पकं तत्समारुह्य परिचक्राम मेदिनीम् ॥ १॥

ततो मरुत्तं नृपतिं यजन्तं सह दैवतैः ।
उशीरबीजमासाद्य ददर्श स तु राक्षसः ॥ २॥

संवर्तो नाम ब्रह्मर्षिर्भ्राता साक्षाद्बृहस्पतेः ।
याजयामास धर्मज्ञः सर्वैर्ब्रह्मगणैर्वृतः ॥ ३॥

दृष्ट्वा देवास्तु तद्रक्षो वरदानेन दुर्जयम् ।
तां तां योनिं समापन्नास्तस्य धर्षणभीरवः ॥ ४॥

इन्द्रो मयूरः संवृत्तो धर्मराजस्तु वायसः ।
कृकलासो धनाध्यक्षो हंसो वै वरुणोऽभवत् ॥ ५॥

तं च राजानमासाद्य रावणो राक्षसाधिपः ।
प्राह युद्धं प्रयच्चेति निर्जितोऽस्मीति वा वद ॥ ६॥

ततो मरुत्तो नृपतिः को भवानित्युवाच तम् ।
अवहासं ततो मुक्त्वा राक्षसो वाक्यमब्रवीत् ॥ ७॥

अकुतूहलभावेन प्रीतोऽस्मि तव पार्थिव ।
धनदस्यानुजं यो मां नावगच्छसि रावणम् ॥ ८॥

त्रिषु लोकेषु कः सोऽस्ति यो न जानाति मे बलम् ।
भ्रातरं येन निर्जित्य विमानमिदमाहृतम् ॥ ९॥

ततो मरुत्तो नृपतिस्तं राक्षसमथाब्रवीत् ।
धन्यः खलु भवान्येन ज्येष्ठो भ्राता रणे जितः ॥ १०॥

नाधर्मसहितं श्लाघ्यं न लोकप्रतिसंहितम् ।
कर्म दौरात्म्यकं कृत्वा श्लाघसे भ्रातृनिर्जयात् ॥ ११॥

किं त्वं प्राक्केवलं धर्मं चरित्वा लब्धवान्वरम् ।
श्रुतपूर्वं हि न मया यादृशं भाषसे स्वयम् ॥ १२॥

ततः शरासनं गृह्य सायकांश्च स पार्थिवः ।
रणाय निर्ययौ क्रुद्धः संवर्तो मार्गमावृणोत् ॥ १३॥

सोऽब्रवीत्स्नेहसंयुक्तं मरुत्तं तं महानृषिः ।
श्रोतव्यं यदि मद्वाक्यं सम्प्रहारो न ते क्षमः ॥ १४॥

महेश्वरमिदं सत्रमसमाप्तं कुलं दहेत् ।
दीक्षितस्य कुतो युद्धं क्रूरत्वं दीक्षिते कुतः ॥ १५॥

संशयश्च रणे नित्यं राक्षसश्चैष दुर्जयः ।
स निवृत्तो गुरोर्वाक्यान्मरुत्तः पृथिवीपतिः ।
विसृज्य सशरं चापं स्वस्थो मखमुखोऽभवत् ॥ १६॥

ततस्तं निर्जितं मत्वा गोषयामास वै शुकः ।
रावणो जितवांश्चेति हर्षान्नादं च मुक्तवान् ॥ १७॥

तान्भक्षयित्वा तत्रस्थान्महर्षीन्यज्ञमागतान् ।
वितृप्तो रुधिरैस्तेषां पुनः सम्प्रययौ महीम् ॥ १८॥

रावणे तु गते देवाः सेन्द्राश्चैव दिवौकसः ।
ततः स्वां योनिमासाद्य तानि सत्त्वान्यथाब्रुवन् ॥ १९॥

हर्षात्तदाब्रवीदिन्द्रो मयूरं नीलबर्हिणम् ।
प्रीतोऽस्मि तव धर्मज्ञ उपकाराद्विहङ्गम ॥ २०॥

मम नेत्रसहस्रं यत्तत्ते वर्हे भविष्यति ।
वर्षमाणे मयि मुदं प्राप्स्यसे प्रीतिलक्षणम् ॥ २१॥

नीलाः किल पुरा बर्हा मयूराणां नराधिप ।
सुराधिपाद्वरं प्राप्य गताः सर्वे विचित्रताम् ॥ २२॥

धर्मराजोऽब्रवीद्राम प्राग्वंशे वायसं स्थितम् ।
पक्षिंस्तवास्मि सुप्रीतः प्रीतस्य च वचः शृणु ॥ २३॥

यथान्ये विविधै रोगैः पीड्यन्ते प्राणिनो मया ।
ते न ते प्रभविष्यन्ति मयि प्रीते न संशयः ॥ २४॥

मृत्युतस्ते भयं नास्ति वरान्मम विहङ्गम ।
यावत्त्वां न वधिष्यन्ति नरास्तावज्जविष्यसि ॥ २५॥

ये च मद्विषयस्थास्तु मानवाः क्षुधयार्दिताः ।
त्वयि भुक्ते तु तृप्तास्ते भविष्यन्ति सबान्धवाः ॥ २६ ॥

वरुणस्त्वब्रवीद्धंसं गङ्गातोयविचारिणम् ।
श्रूयतां प्रीतिसंयुक्तं वचः पत्ररथेश्वर ॥ २७ ॥

वर्णो मनोहरः सौम्यश्चन्द्रमण्डलसंनिभः ।
भविष्यति तवोदग्रः शुक्लफेनसमप्रभः ॥ २८ ॥

मच्छरीरं समासाद्य कान्तो नित्यं भविष्यसि ।
प्राप्स्यसे चातुलां प्रीतिमेतन्मे प्रीतिलक्षणम् ॥ २९ ॥

हंसानां हि पुरा राम न वर्णः सर्वपाण्डुरः ।
पक्षा नीलाग्रसंवीताः क्रोढाः शष्पाग्रनिर्मलाः ॥ ३० ॥

अथाब्रवीद्वैश्वरणः कृकलासं गिरौ स्थितम् ।
हैरण्यं सम्प्रयच्छामि वर्णं प्रीतिस्तवाप्यहम् ॥ ३१ ॥

सद्रव्यं च शिरो नित्यं भविष्यति तवाक्षयम् ।
एष काञ्चनको वर्णो मत्प्रीत्या ते भविष्यति ॥ ३२ ॥

एवं दत्त्वा वरांस्तेभ्यस्तस्मिन्यज्ञोत्सवे सुराः ।
निवृत्ते सह राज्ञा वै पुनः स्वभवनं गताः ॥ ३३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com